UGC - CARE LISTED

ISSN: 0974 - 8946

अनुसन्धान-प्रकाशन-विभागीया त्रैमासिकी शोध-पत्रिका

# शोध–प्रभा

(A Refereed & Peer-Reviewed Quarterly Research Journal)

44 वर्षे चतुर्थोऽङ्कः (अक्टूबरमासाङ्कः) 2019

प्रधानसम्पादकः
प्रो.रमेशकुमारपाण्डेयः
कुलपतिः

सम्पादकः
प्रो.शिवशङ्करमिश्रः

सहसम्पादकः
डॉ.ज्ञानधरपाठकः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए' श्रेण्या प्रत्यायितः, मानितविश्वविद्यालयः)
नवदेहली-16

# विषयानुक्रमणिका

## संस्कृतविभागः


1. पूर्वोत्तरमीमांसादर्शनयोर्देवतातत्त्वम् — प्रो. रामानुज उपाध्यायः 1-4
2. विशिष्टाद्वैतमते ब्रह्मणः सर्वशब्दवाच्यत्वम् — प्रो. के. अनन्तः 5-9
3. न्यायदर्शनीयविशिष्टशक्तिवादविमर्शः — डॉ. रामचन्द्रशर्मा 10-16
4. विलियमवर्ड्स्वर्थप्रतिपादितानां साहित्यिकसमीक्षासिद्धान्तानां विमर्शः — डॉ. सुमनकुमारझाः 17-26
5. बौद्धशिक्षायां मानवधर्मः — डॉ. ऋषिराजः 27-31
6. 'जानकीजीवन' महाकाव्ये युगबोधविमर्शः — डॉ. दिनेशकुमारगर्गः 32-38
7. पुराणेषु वृक्षायुर्ज्ञानम् — श्रीखेमराजरेग्मी 39-43
8. प्राच्यपाश्चात्यमतयोरयनांशस्वरूपम् — श्रीअरुणशर्मा 44-47
9. आचार्यविश्वनाथकृतध्वन्यालोकमतखण्डनस्य लोचनदिशामण्डनम् — श्रीरविकान्तो भारद्वाजः 48-52

UGC - CARE Listed
अक्टूबर-दिसम्बर, 2019

शोधप्रभा
वर्ष : 44, चतुर्थोऽङ्कः

# विलियमवर्ड्स्वर्थप्रतिपादितानां साहित्यिकसमीक्षासिद्धान्तानां विमर्शः

डॉ.सुमनकुमारझाः*

William Wordsworth (7 April 1770 – 23 April 1850) was a major English Romantic poet who, with Samuel Taylor Coleridge, helped to launch the Romantic Age in English literature with their joint publication Lyrical Ballads (1798) . Wordsworth's magnum opus is generally considered to be The Prelude, a semi-autobiographical poem of his early years that he revised and expanded a number of times. It was posthumously titled and published, before which it was generally known as "the poem to Coleridge". Wordsworth was Britain's poet laureate from 1843 until his death from pleurisy on 23 April 1850. The second of five children born to John Wordsworth and Ann Cookson, William Wordsworth was born on 7 April 1770 in Wordsworth House in Cockermouth, Cumberland, part of the scenic region in northwestern England known as the Lake District. His sister, the poet and diarist Dorothy Wordsworth, to whom he was close all his life, was born the following year, and the two were baptised together. They had three other siblings: Richard, the eldest, who became a lawyer: John, born after Dorothy, who went to sea and died in 1805 when the ship of which he was captain, the Earl of Abergavenny, was wrecked off the south coast of England; and Christopher, the youngest, who entered the Church and rose to be Master of Trinity College, His notable works are **lyrical ballads**, poems, in two volumes, The Excursion, The prelude, i wandered as a cloud , literary movement- Romanticism

पाश्चात्यकाव्यशास्त्रस्य विकासयात्रायां विलियमवर्ड्स्वर्थमहोदयस्यावदानं नूनमेव महत्त्वपूर्णं प्रतिभाति। तेन अष्टादश-शताब्द्यां प्रचलितां काव्यरचनाशैलीं निराकृत्य, नवशास्त्रवादेन सह साहित्यसमीक्षासिद्धान्तस्य यः सम्बन्धः पूर्ववर्तिभिर्विचारकैः स्थापित

₹ 25

ISSN : 2278-8360

# संस्कृत–मञ्जरी

अन्ताराष्ट्रिया मूल्याङ्किता त्रैमासिकी शोधपत्रिका

वर्षम् १७ अङ्कः ४

अप्रैल तः जून २०१९ पर्यन्तम्

सम्पादकः
डॉ.जीतराम भट्टः
सचिवः

# अनुक्रमणिका


संस्कृतभागः- पृष्ठसंख्या

सम्पादकीयम् III

१. वेदाङ्गेषु व्याकरणम् १
-डॉ. प्रत्यूषवत्सला द्विवेदी

२. साहित्यविद्याया वेदमूलकत्वम् साहित्यशास्त्रस्य वेदोपजीवकत्वञ्च ५
-डॉ. सुमनकुमार झा

३. वैयाकरणानुसारेण समासस्यनिरूपणम् १६
-हेमलता आर्या

४. ''व्याकरणशास्त्रे मानवीयमूल्यानि ३०
-डॉ. दीपककुमारकोठारी

५. वेदेषु सामाजिकविज्ञाने महिलायाः पात्रम् ३५
-डॉ. वेणीमाधवशास्त्री "जोशी"

६. प्राणाद् विश्वसमुद्भवः ४०
-डॉ. रघुनाथदासः 'श्रीवैष्णवः'

७. औपनिषदः पुरुषः ४४
-डॉ. जगदीश प्रसाद शर्मा

हिन्दीभागः-

८. मत्स्यपुराणवर्णित-ययाति के सात रोचक पाठान्तर ४८
-डॉ. कमलेशकुमार छ. चोकसी

९. वाल्मीकि रामायण में उपमा अलंकार ५५
-डॉ. शशिकान्त द्विवेदी

१०. अभिज्ञानशाकुन्तल में पुत्री के पर्याय ६८
- डॉ. मीरा द्विवेदी

अंग्रेजीभागः-

११. AGRICULTURAL CERMONIES IN ANCIENT INDIA ८२
- Dr. Remy K.P

# साहित्यविद्याया वेदमूलकत्वम्
# साहित्यशास्त्रस्य वेदोपजीवकत्वञ्च

-डॉ. सुमनकुमारझा

**संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः।**

संस्कृतभाषेयं सर्वास्वपि विश्वभाषासु प्राचीनतमेति भाषाशास्त्रविदामुद्घोषः। भाषान्तरविलक्षणैर्विशिष्टैः प्रकृतिप्रत्ययादिसंस्कारविशेषैः संस्कृतत्वादियं किल संस्कृतभाषेत्यन्वर्थसंज्ञा लेभे। संस्कृतभाषायाः साहित्यमपि प्राचीनतममतिविशालञ्च। तच्चेदं संस्कृतसाहित्यं द्विविधं खलु विभज्यते- वैदिकं लौकिकञ्चेति। तत्र वैदिके तावद्वेदाः, उपवेदाः, वेदाङ्गानि, उपनिषदः, पुराणानि च संगृह्यन्ते। लौकिके तु वाल्मीकिरामायणादारभ्य अद्यावधि विरचितमगाधं विपुलं समग्रञ्च संस्कृतसाहित्यं गृह्यते।

नियमश्चायं कश्चन यल्लोकेऽस्मिन् प्रयोजनायोपकल्पितः सर्वोऽपि विषयः तदनुबन्धिशासनकरं शास्त्रमेकमपेक्षत एवेति। शास्त्रविधिमविदित्वैव यदि स्वबुद्ध्या इष्टमनिष्टं वा कल्प्यते, तदा गर्ते पतनं, श्रेयःप्रेयोभ्यां भ्रंशश्चानिवार्य एव। अत एव अस्माकं भारतीयचिन्तने तत्त्वबोधाय विविधानि शास्त्राणि प्रादुर्भूतानि, विविधाश्च विद्याः प्रादुर्भूताः। तेषां सर्वेषां शास्त्राणां सर्वासां च विद्यानां वेदमूलकता शास्त्रकारैराचार्यैर्महाकविभिः समालोचकैश्चाप्यङ्गीक्रियत एव, सन्दर्भेऽस्मिन् नास्ति काऽपि विप्रतिपत्तिः। यतो वेदाः सृष्टेः प्रप्रथमो ज्ञानराशिः, प्रप्रथमं काव्यञ्च। तत् एवान्यत्सर्वं ज्ञानं विज्ञानञ्चोद्भावितमिति सर्वस्वीकृतसिद्धान्तः। यतः- **अपौरुषेयं वाक्यं वेद इति** सायणीयऋग्भाष्ये। वस्तुतः कोऽपि दिव्यतमः प्रकाशो वेदाह्वयो नाम, परमकारुणिकेन भगवता परमेश्वरेण प्रणोदितः। यत्रेदमाम्नायते-

**यज्ञेन वाचः पदवीयमायन्ताभन्वविन्दन्नृषिषु प्रविष्टाम्।**[1]

अपि च-

**तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे।**
**छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत॥**[2]

अपि च-**इष्टप्राप्त्यानिष्टपरिहारयोरलौकिकमुपायं यो वेदयति स वेद** इति सायणीयकृष्णजयुर्वेदीयभाष्य-भूमिकायाम्। 'विद् ज्ञाने' इति ज्ञानार्थकाद् धातोर्घञि प्रत्यये कृते 'वेद' इति रूपं निष्पद्यते। विद् सत्तायाम्, विद् विचारणे, विद् लृ लाभे, विद् चेतनाख्याननिवासेषु इति धातुभ्यो 'घञि' 'वेद' इति रूपं निष्पद्यते। वेदार्थानुशीलनाद् ज्ञायते यत्वेदा हि विविधज्ञानविज्ञानराशयः संस्कृतेराधाररूपा जीवनस्योन्नायकाः कर्त्तव्याकर्त्तव्यबोधका मानवीय-मूल्यप्रदायका मानवधर्मनिरूपकाश्च सन्ति। उक्तञ्च मनुना- **वेदोऽखिलो धर्ममूलम्**[3]

**यः कश्चित् कस्यचिद् धर्मो मनुना परिकीर्तितः।**
**स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः॥**[4]

भारतीयसंस्कृतेः साहित्यस्यापि च मूलरूपं वेदेष्वेवोपलभ्यते। यजुर्वेदे- **'सा प्रथमा संस्कृतिर्विश्ववारा'**

राष्ट्रीय मूल्यांङ्कित पत्रिका

ISSN 2456-6853

# श्यामला

अर्धवार्षिक संस्कृत पत्रिका

जुलाई-दिसम्बर 2019



हिमाचल कला संस्कृति भाषा अकादमी

# क्रमः

सम्पादकीयम्

| | | |
|---|---|---|
| गद्यलोकः | | 5-71 |
| • कर्मकाण्डे यज्ञानां महत्त्वम् | डॉ. कृष्णमोहनपाण्डेयः | 5 |
| • वैश्विकसंवैधानिकप्ररिप्रेक्ष्ययोः हिमाचलप्रदेशे संस्कृतस्य द्वितीयराजभाषात्वेनावचारणम् | डॉ. मनोहरलाल आर्यः | 12 |
| • सूर्यस्य चेतनत्वं सर्वोपकारकत्वञ्च | डॉ. चेतनापाण्डेयः | 24 |
| • को नाम पिण्डः | डॉ. श्यामलाल डोगरा | 31 |
| • आचार्य दिवाकरदत्तमहाभागानां संस्कृत-संस्कृति-संस्कारपुनरुत्थाने योगदानम् | प्रो. केशव शर्मा | 38 |
| • चातुर्मास्ययागस्य वैज्ञानिकं महत्त्वम् | विद्यावाचस्पतिः डॉ. सुन्दरनारायणझाः | 49 |
| • विलियमवर्ड्स्वर्थप्रतिपादितानां साहित्यिकसमीक्षासिद्धान्तानां विमर्शः | डॉ. सुमनकुमारझाः | 56 |
| • आधुनिके संस्कृते नवविधानामनुप्रयोगाः | डॉ. रामप्रीतसिंहः | 65 |
| • आधारभाषात्वेन संस्कृतस्य शिक्षणम् | डॉ. शिवकुमारमिश्रः | 69 |
| कथालोकः | | 72-74 |
| • तिस्रः लघुकथाः | डॉ. रामदत्त शर्मा | 72 |
| नाटकलोकः | | 75-85 |
| • सिकन्दरपराजयः | पार्वती देवी | 75 |
| • जनताधुना जागरिष्यति | पं. मिथिलेश शास्त्री | 79 |
| पद्यलोकः | | 86-92 |
| • षट्स्तोत्राणि | विद्यावाचस्पतिः डॉ. रामकिशोरमिश्रः | 86 |
| • तिस्रः कविताः | डॉ. मनोजशैलः | 91 |
| हिमाचलसंस्कृतिदर्पणम् | | 93-109 |
| • बिलासपुरसंस्कृतिगौरवम् | डॉ. मनोहरलाल आर्यः | 93 |
| • अकादम्याः गतिविधयः | | 110 |

# विलियमवर्ड्स्वर्थप्रतिपादितानां साहित्यिकसमीक्षासिद्धान्तानां विमर्शः

डॉ. सुमनकुमारझाः

पाश्चात्त्यकाव्यशास्त्रस्य विकासयात्रायां विलियमवर्ड्स्वर्थमहोदयस्यावदानं नूनमेव महत्त्वपूर्णं प्रतिभाति। तेन अष्टादश-शताब्द्यां प्रचलितां काव्यरचनाशैलीं निराकृत्य, नवशास्त्रवादेन सह साहित्यसमीक्षासिद्धान्तस्य यः संबन्धः पूर्ववर्तिभिर्विचारकैः स्थापितः, तत्संबन्धं सिद्धान्तञ्चापि निराकृत्य साहित्यसर्जनस्य साहित्यसमीक्षायाश्चैका नूतना विचारधारा प्रवर्तिता,या स्वच्छन्दतावादः (Romanticism) नाम्ना अभिधीयते। अनेन वादेन सह साहित्यालोचनस्य सर्जनस्य चेको नवीनो मार्गः प्रवर्तितः पाश्चात्त्यसाहित्यजगति।

वस्तुतो वर्ड्स्वर्थप्रतिपादितः काव्यशास्त्रीयसिद्धान्तः स्वच्छन्दतावादस्य घोषणापत्रं (Manifesto) मन्यते। यतोऽनेन सिद्धान्तेन पश्चिमजगति काव्यसर्जनस्य साहित्यसमीक्षायाश्च नवीना सरणिः आविर्भूता। तन्निरूपितः साहित्यिकसमीक्षा-संबन्धिविचारः तस्यैव काव्यसंग्रहः 'लिरिकल-बैलेड्स' ग्रन्थस्य द्वितीयसंस्करणस्य भूमिकायां प्रकाशितः। यत्रासौ कवि-कविता-काव्यभाषा- काव्यरचनाप्रक्रियासु स्वकीयं चिन्तनं न्यरूपयत। तद्विरचिता भूमिकेयं आंग्लसाहित्येतिहासस्य सर्वाधिको महत्त्वपूर्णोऽभिलेखो मन्यते। यद्यप्यभिलेखेऽस्मिनभिव्यक्ताः तस्य विचारा नान्तिमाः, यतः तत्पश्चाल्लिखितेषु शोधनिबन्धेषु तेन स्वकीयाः पूर्वप्रतिपादिताः विचाराः परिवर्तिताः परिवर्धिताश्च, तथापि अस्यां भूमिकायां प्रकटितानां विचाराणां महत्त्वमैतिहासिकमविस्मरणीयञ्च वर्तते। अस्य पुष्टिरनेन कथनेनापि भवति It has been regarded in certain quarters as declaration of literary rights, a powerful documents in the liberating of letters from bondage it rainsed a wall between the eighteenth and nineteenth centuries: it dated a new era.[1] वर्ड्स्वर्थमहोदयात्पूर्वं दान्तेमहोदयो भावनानां सहजोच्छलनमेव काव्यमिति मतं निराकृत्य, श्रमसाध्यमभ्यासेन चोद्भवं भवति काव्यमिति मेने। यद्यपि तेन कवितासु देशभाषाप्रयोगस्य परामर्शः प्रदत्तः परं देशभाषया (Vernacular) अस्याभिप्रायो जनसाधारणेन प्रयुक्तया दिन-प्रतिदिनस्य भाषया साकं नासीत्।

UGC - CARE LISTED

ISSN: 0974-8946

अनुसन्धान-प्रकाशन-विभागीया त्रैमासिकी शोध-पत्रिका

# शोध-प्रभा

(A Refereed & Peer-Reviewed Quarterly Research Journal)

45 वर्षे द्वितीयोऽङ्कः ( अप्रैलमासाङ्कः ) 2020

प्रधानसम्पादकः
प्रो.रमेशकुमारपाण्डेयः
कुलपतिः

सम्पादकः
प्रो.शिवशङ्करमिश्रः

सहसम्पादकः
डॉ.ज्ञानधरपाठकः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
केन्द्रीयविश्वविद्यालयः
नवदेहली-16

# विषयानुक्रमणिका

## संस्कृतविभागः


| | | |
|---|---|---|
| 1. अर्थनिर्धारणे वैदिकस्वराणां वैशिष्ट्यम् | **प्रो. रामानुज उपाध्यायः** | 1–4 |
| 2. आइ.ए.रिचर्ड्सप्रतिपादितानां काव्यशास्त्रीयसिद्धान्तानां विमर्शः | **प्रो. सुमनकुमारझाः** | 5–15 |
| 3. न्यायवैशेषिकदर्शनयोः लौकिकन्यायानां शिक्षणप्रविधिरूपेण प्रयोगः | **डॉ. अनीता राजपालः** | 16–24 |
| 4. मेघदूते स्त्रीवाचकपदानां वैशिष्टयम् | **डॉ. बी. बी. त्रिपाठी** | 25–30 |
| 5. श्रीमद्वाल्मीकिरामायणे राजपोषितानि वनान्युपवनानि च | **डॉ. गोपालकुमारझा** | 31–37 |
| 6. सहशब्दशक्तिनिर्णयः व्युत्पत्तिवाददिशा | **डॉ. बालमुरुगुन् रविचन्द्रः** | 38–45 |
| 7. वेदविज्ञाने षोडशकलः | **डॉ. लक्ष्मीकान्तविमलः** | 46–55 |
| 8. पुराणवाङ्मये वर्णितानां सदाचाराणां विश्लेषणम् | **श्रीमतिः प्रियंवदा काफ्ले** | 56–72 |
| 9. प्रमाणमञ्जर्यामिन्द्रियाणां स्वरूपविमर्शः | **श्रीनवीनकुमारः** | 73–77 |

# आइ.ए.रिचर्ड्सप्रतिपादितानां काव्यशास्त्रीयसिद्धान्तानां विमर्शः

प्रो.सुमनकुमारझाः*

Ivor Armstrong Richards (26 February 1893 – 7 September 1979), known as I. A. Richards, was an English educator, literary critic, and rhetorician whose work contributed to the foundations of the New Criticism, a formalist movement in literary theory, which emphasized the close reading of a literary text, especially poetry, in an effort to discover how a work of literature functions as a self-contained, self-referential aesthetic object.

Richards' intellectual contributions to the establishment of the literary methodology of the New Criticism are presented in the booksThe Meaning of Meaning: A Study of the Influence of Language upon Thought and of the Science of Symbolism (1923), by C. K. Ogden and I. A. Richards, Principles of Literary Criticism (1926), Practical Criticism (1929), and The Philosophy of Rhetoric (1936).

पाश्चात्त्यसाहित्यिकसमीक्षकेषु रिचर्ड्समहोदयस्य स्थानमनुपमं वर्तते। रिचर्ड्समहोदयस्य जन्म इंग्लैण्डदेशस्य चेशायनगरे 1893 ई.वर्षेऽभूत्। अनेन क्लिफ्टन-कैम्ब्रिजविश्वविद्यालयाभ्यां शिक्षाऽधिगता। कैम्ब्रिज-पेकिंग-हार्वर्डविश्वविद्यालयेषु अनेन मनोविज्ञानमर्थविज्ञानमाङ्ग्लसाहित्यञ्चेति विषया अध्यापिताः। हार्वर्डविश्वविद्यालयेऽयमाङ्ग्लसाहित्यविषयस्य आचार्य आसीत्। कैम्ब्रिजविश्वविद्यालयेऽयं मनोविज्ञानार्थविज्ञानयोरध्यापनमपि चकार। यस्य महान् प्रभावः पश्चिमजगति प्रससार। तेन यद्यपि नैकं ग्रन्थाः विरचिताः, परं तेषु प्रमुखाः सन्ति- **प्रिंसिपल ऑफ लिटरेरी क्रिटिसिज्म (१९२४), प्रैक्टिकल क्रिटिसिज्म (१९२९), फिलोसफी ऑफ रिटोरिक (१९३६), हाउ टु रीड ए पेज (१९४२) च।**

---

* आचार्यः, साहित्यविभागः, श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,नवदेहली-16

UGC CARE LISTED

ISSN 2278-0416

# हरिप्रभा

अन्ताराष्ट्रिया मूल्याङ्किता त्रैमासिकी शोधपत्रिका

PEER REVIEWED, REFEREED, OPEN ACCESS, INDEXED
INTERNATIONAL QUARTERLY RESEARCH JOURNAL (UGC CARE LISTED)

वर्षम् : १९, अंङ्क : ०१-०३, जनवरी - मार्च - २०२२



हरित्वता वर्चसा सूर्यस्य श्रेष्ठै रूपैस्तन्वं स्पर्शयस्व।
अस्माभिरिन्द्र सखिभिर्हुवानः सध्रीचीनो मादयस्वा निषद्य॥
(ऋक् १०/११२/३)

हरियाणा – संस्कृत – अकादमी, पंचकूला

# अनुक्रमणिका


सम्पादकीयम्

१ अभिज्ञानशाकुन्तले निहितं स्त्रीचिन्तनम् — डॉ. अनिलकुमारः

२ शाकुन्तलं सेव्यतामित्यत्र कालिदासस्य वैशिष्ट्यम् — डॉ. शान्तिलालसालवी

३. उपनिषद्पृष्ठभूमौ उद्गीथस्य विवेचनम् — अंग्रेजः

४ गोपथब्राह्मणे सुभाषितेषु निहितानि जीवनतत्त्वानि — डॉ. देवीसिंहः

५ भगवद्गीतायां कर्मयोगस्तन्महत्त्वञ्च — मुकेशकुमारः

६. काव्यादर्शे श्लोकादर्शसन्दर्भः — डॉ. राधावल्लभशर्मा

७. पाश्चात्यकाव्यशास्त्रे औदात्त्यसिद्धान्तविमर्शः — प्रो. सुमनकुमारझाः

८ प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् इति परिभाषासमीक्षणम् — डॉ. अशोककुमारमिश्रः

९. मम्मटदिशा काव्यनिबन्धनम् — डॉ. रविः

१० ध्वनेराद्योपादान विमर्शः — डॉ. राजकुमारमिश्रः

११. "उरण् रपरः" इति सूत्रविषये कौस्तुभसुधानिधिकृन्मतसमीक्षा — डॉ. पंकजकुमारव्यासः

UGC CARE Listed
ISSN 2278-0416

# पाश्चात्त्यकाव्यशास्त्रे औदात्त्यसिद्धान्तविमर्शः

*प्रो. सुमनकुमारझाः

पाश्चात्त्यकाव्यशास्त्रेतिहासे ये-ये काव्यशास्त्रिणोऽभवन् ते सर्वे स्वीयेन वैदुष्येण अभिनवचिन्तनेन च साहित्यसमीक्षणस्य मार्गमग्रे तेनुः। तेषु पाश्चात्त्यसाहित्यसमीक्षकेषु लॉन्जाइनसमहोदयोऽन्यतमो विद्यते। अनेन साहित्यसमीक्षकेण निरूपितः औदात्त्यसिद्धान्तः पाश्चात्त्य-साहित्यसमालोचनायां विशिष्टं स्थानं विभर्तीति निश्चप्रचम्। अरंस्तूमहोदयानन्तरं लॉन्जाइनसमहोदयो यूनानदेशस्य महान्विचारकः साहित्यसमीक्षकश्च मन्यते। कैश्चिद्विद्वद्भिरयम् ई. पूर्व तृतीयशताब्द्याः यूनानीचिन्तको मन्यते, कैश्चिच्च प्रथमशताब्द्यां रोमदेशस्य काव्यशास्त्री मन्यते। यथातथ्यं किञ्चिदपि स्यात्, अस्य समयः ई. पूर्वतृतीयशताब्द्यां स्वीक्रियते पाश्चात्त्यविद्वद्भिः। अनेन साहित्यसर्जनाय समीक्षणाय च औदात्त्यसिद्धान्तः प्रतिष्ठापितः, यतः तदानीन्तने युगे साहित्ये न्यूनता परिलक्ष्यते स्म, कवयः काव्येषु नवत्व-चमत्कारयोः प्रदर्शनमधिकं कुर्वन्ति स्म, अतः तां प्रवृत्तिं निरसनाय अपि च काव्यसर्जनाय नवीनमेकं तत्त्वमुद्घाटितं यदुदात्ततत्त्वनाम्ना प्रसिद्धिमवाप्तवान्।

कालान्तरे तत्त्वस्यास्य विस्तारः औदात्यसिद्धान्तरूपेण सञ्जातः। अनेन सिद्धान्तेन लॉन्जाइनसमहोदयस्य प्रतिष्ठा साहित्यसमीक्षकत्वेन सञ्जाता। **पेरिहुप्सुम** (दि सब्लाइम) इत्यस्मिन् ग्रन्थे तेन उदात्ततत्त्वं सविस्तरेण विवेचितम्। **'पेरिहुप्सुमः'** (The Sublime) इत्यस्य ग्रन्थस्यान्वेषणं षोडशशताब्द्यां बभूव। ग्रन्थस्यास्य प्रथमं संस्करणं १५५४ ई. मध्ये प्रकाशितं यदिदानीमपूर्णं मन्यते। **'पेरिहुप्सुस'** इत्यस्य आङ्गलानुवादः **'दि सब्लाइम'** इति नाम्ना प्राप्यते। ग्रन्थस्य यावान् अंश उपलभ्यते, तत्र खण्डद्वयं वर्तते। प्रथमे खण्डे उदात्तशैली विवेचिताऽस्ति, द्वितीये खण्डे च कलाया आधार- भूततत्त्वानि प्रकाशितानि सन्ति। औदात्त्यसिद्धान्तः काव्यरचनायै महत्त्वपूर्णः प्रतिभाति। लॉन्जाइन- समहोदयेन काव्येषु औदात्त्यतत्त्वं प्रतिष्ठाप्य साहित्यं विशिष्टं भव्यं च भवेदिति प्रयत्नः कृतः। सिद्धान्तेऽस्मिन् तेन तथ्यमिदं प्रकाशितं यत्केषां वृत्तानां तथ्यानां च समावेशेन काव्येषु औदात्यं प्रतिष्ठापयितुं शक्यते। तन्मते भावानां विचाराणाञ्च उदात्तता एव साहित्यस्य वैशिष्ट्यं निर्धारयति। औदात्त्येनैव पाठको दर्शकः श्रोता च साहित्येन प्रभावितो भवति। सहृदयसामाजिकाः साहित्यं प्रत्याकृष्टाः भवन्ति। काव्यस्योद्देश्यं भवेत् उदात्तवर्णनमुदात्तप्रभावसंप्रेषणञ्च।

लॉन्जाइनसमहोदयस्य औदात्त्यसम्बद्धावधारणा व्यापिका महती च विद्यते। तत्र साहित्येतरविषयाः यथा इतिहास-धर्म-दर्शन-संस्कृति-सभ्यताप्रभृतयोऽपि समाविश्यन्ते। अनेन औदात्त्यस्य प्रेरणा कैसिलियसमहोदायस्य शोधनिबन्धात् गृहीता, यस्य निबन्धस्य शीर्षकं

* साहित्यविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः नवदेहली-१६
दूरभाषः- ८८५१८८६१५१, ९८६८०८५७८५, e-mail - sumanjhalbs@gmail.com